# शालतोड़ा नेताजी सेन्टेनारी कलेज

## सञ्चिता साँतरा

## सह्कारी अध्यापिका

## संस्कृत विभागः



# तृतीया विभक्तिविधायकम् सूत्रम्

## ‘येनाङ्गविकारः’(२/३/२०)

- **पदच्छेदः** – येन (तृतीया एकवचनम्, अङ्गविकारः (प्रथमा एकवचनम्)।

- **अनुवृत्तिः** – ‘कर्तृकरणयोस्तृतीया’ (२/३/१८) इति सूत्रात् तृतीया पदम्।

- **अधिकारः** – अनभिहिते (२/३/१)

# दीक्षितवचनम्

येनाङ्गेन विकृतेन अङ्गिनो विकारः लक्ष्यते ततस्तृतीया स्यात्।

अक्ष्णा काणः ।

अक्षिसम्वन्धिकाणत्वविशिष्ट इत्यर्थः।

‘अङ्गविकारः’ किम् ? अक्षि काणमस्य।

# सूत्रार्थः

अङ्गंविकारः= शरीरविकारः। अतः येन विकृतेन अङ्गेन सम्पूर्णशरीरस्य विकारः लक्ष्यते, तस्मिन् विकृताङ्गवाचकप्रातिपदिके तृतीया विभक्तिः भवति।

# उदाहरणम्

- नरः अक्ष्णा काणः।( अक्षिसम्वन्धिकाणत्वविशिष्टः नरः  इत्यर्थः।)
- मुखेन त्रिलोचनः देवी।



स्वाभाविकः



आधिक्यम्



हानिः

# <u>उदाहरणम्</u>









**स्वाभाविकः** **आधिक्यम्** **हानिः**

# “अङ्गंविकारः किम् ?”

यदि विकृताङ्गेन  सम्पूर्णशरीरस्य विकारः न लक्ष्यते, तर्हि तत्र विकृताङ्गे  तृतीया विभक्तिः न भवति।

उदाहरणम्

अक्षि काणमस्य

अत्र ‘अक्षि’ इति विकृताङ्गवाचकशव्देन सम्पूर्णशरीरस्य विकारः न लक्ष्यते। ततः ‘अक्षि’ इत्यत्र प्रातिपदिकार्थे प्रथमा भवति।

